www.prepp.in

Test Booklet Code & Serial No.
प्रश्नपत्रिका कोड व क्रमांक

**D**

# Paper-III
# SANSKRIT

**Signature and Name of Invigilator**

1. (Signature) ..........................................

(Name) ..........................................

2. (Signature) ..........................................

(Name) ..........................................

Seat No. | | | | | | |

(In figures as in Admit Card)

Seat No. ..............................................................

(In words)

OMR Sheet No. | | | | | | |

(To be filled by the Candidate)

## APR - 04317

**Time Allowed : 2½ Hours]** **[Maximum Marks : 150**

Number of Pages in this Booklet : **16** Number of Questions in this Booklet : **75**

### Instructions for the Candidates

1. Write your Seat No. and OMR Sheet No. in the space provided on the top of this page.
2. This paper consists of **75** objective type questions. Each question will carry *two* marks. *All* questions of Paper-III will be compulsory, covering entire syllabus (including all electives, without options).
3. At the commencement of examination, the question booklet will be given to the student. In the first 5 minutes, you are requested to open the booklet and compulsorily examine it as follows :
   (*i*) To have access to the Question Booklet, tear off the paper seal on the edge of this cover page. Do not accept a booklet without sticker-seal or open booklet.
   (*ii*) **Tally the number of pages and number of questions in the booklet with the information printed on the cover page. Faulty booklets due to missing pages/questions or questions repeated or not in serial order or any other discrepancy should not be accepted and correct booklet should be obtained from the invigilator within the period of 5 minutes. Afterwards, neither the Question Booklet will be replaced nor any extra time will be given. The same may please be noted.**
   (*iii*) After this verification is over, the OMR Sheet Number should be entered on this Test Booklet.
4. Each question has four alternative responses marked (A), (B), (C) and (D). You have to darken the circle as indicated below on the correct response against each item.
   **Example :** where (C) is the correct response.

   (A) (B) ● (D)
5. Your responses to the items are to be indicated in the **OMR Sheet given inside the Booklet only.** If you mark at any place other than in the circle in the OMR Sheet, it will not be evaluated.
6. Read instructions given inside carefully.
7. Rough Work is to be done at the end of this booklet.
8. If you write your Name, Seat Number, Phone Number or put any mark on any part of the OMR Sheet, except for the space allotted for the relevant entries, which may disclose your identity, or use abusive language or employ any other unfair means, you will render yourself liable to disqualification.
9. You have to return original OMR Sheet to the invigilator at the end of the examination compulsorily and must not carry it with you outside the Examination Hall. You are, however, allowed to carry the Test Booklet and duplicate copy of OMR Sheet on conclusion of examination.
10. **Use only Blue/Black Ball point pen.**
11. **Use of any calculator or log table, etc., is prohibited.**
12. **There is no negative marking for incorrect answers.**

### विद्यार्थ्यांसाठी महत्त्वाच्या सूचना

1. परिक्षार्थींनी आपला आसन क्रमांक या पृष्ठावरील वरच्या कोपऱ्यात लिहावा. तसेच आपणांस दिलेल्या उत्तरपत्रिकेचा क्रमांक त्याखाली लिहावा.
2. सदर प्रश्नपत्रिकेत 75 बहुपर्यायी प्रश्न आहेत. प्रत्येक प्रश्नास **दोन** गुण आहेत. या प्रश्नपत्रिकेतील **सर्व** प्रश्न सोडविणे अनिवार्य आहे. सदरचे प्रश्न हे या विषयाच्या संपूर्ण अभ्यासक्रमावर आधारित आहेत.
3. परीक्षा सुरू झाल्यावर विद्यार्थ्याला प्रश्नपत्रिका दिली जाईल. सुरुवातीच्या 5 मिनीटांमध्ये आपण सदर प्रश्नपत्रिका उघडून खालील बाबी अवश्य तपासून पहाव्यात.
   (*i*) प्रश्नपत्रिका उघडण्यासाठी प्रश्नपत्रिकेवर लावलेले सील उघडावे. सील नसलेली किंवा सील उघडलेली प्रश्नपत्रिका स्विकारू नये.
   (*ii*) **पहिल्या पृष्ठावर नमूद केल्याप्रमाणे प्रश्नपत्रिकेची एकूण पृष्ठे तसेच प्रश्नपत्रिकेतील एकूण प्रश्नांची संख्या पडताळून पहावी. पृष्ठे कमी असलेली/कमी प्रश्न असलेली/प्रश्नांचा चूकीचा क्रम असलेली किंवा इतर त्रुटी असलेली सदोष प्रश्नपत्रिका सुरुवातीच्या 5 मिनिटातच पर्यवेक्षकाला परत देऊन दुसरी प्रश्नपत्रिका मागवून घ्यावी. त्यानंतर प्रश्नपत्रिका बदलून मिळणार नाही तसेच वेळही वाढवून मिळणार नाही याची कृपया विद्यार्थ्यांनी नोंद घ्यावी.**
   (*iii*) वरीलप्रमाणे सर्व पडताळून पहिल्यानंतरच प्रश्नपत्रिकेवर ओ.एम.आर. उत्तरपत्रिकेचा नंबर लिहावा.
4. प्रत्येक प्रश्नासाठी (A), (B), (C) आणि (D) अशी चार विकल्प उत्तरे दिली आहेत. त्यातील योग्य उत्तराचा रकाना खाली दर्शविल्याप्रमाणे ठळकपणे काळा/निळा करावा.
   **उदा. :** जर (C) हे योग्य उत्तर असेल तर.

   (A) (B) ● (D)
5. या प्रश्नपत्रिकेतील प्रश्नांची उत्तरे **ओ.एम.आर. उत्तरपत्रिकेतच दर्शवावीत.** इतर ठिकाणी लिहीलेली उत्तरे तपासली जाणार नाहीत.
6. आत दिलेल्या सूचना काळजीपूर्वक वाचाव्यात.
7. प्रश्नपत्रिकेच्या शेवटी जोडलेल्या कोऱ्या पानावरच कच्चे काम करावे.
8. जर आपण ओ.एम.आर. वर नमूद केलेल्या ठिकाणा व्यतिरीक्त इतर कोठेही नाव, आसन क्रमांक, फोन नंबर किंवा ओळख पटेल अशी कोणतीही खूण केलेली आढळून आल्यास अथवा असभ्य भाषेचा वापर किंवा इतर गैरमार्गांचा अवलंब केल्यास विद्यार्थ्याला परीक्षेस अपात्र ठरविण्यात येईल.
9. परीक्षा संपल्यानंतर विद्यार्थ्याने मूळ ओ.एम.आर. उत्तरपत्रिका पर्यवेक्षकांकडे परत करणे आवश्यक आहे. तथापी, प्रश्नपत्रिका व ओ.एम.आर. उत्तरपत्रिकेची द्वितीय प्रत आपल्याबरोबर नेण्यास विद्यार्थ्यांना परवानगी आहे.
10. **फक्त निळ्या किंवा काळ्या बॉल पेनचाच वापर करावा.**
11. **कॅलक्युलेटर किंवा लॉग टेबल वापरण्यास परवानगी नाही.**
12. **चुकीच्या उत्तरासाठी गुण कपात केली जाणार नाही.**

www.prepp.in

www.prepp.in

Prepp
Your Personal Exams Guide

APR - 04317/III—D

# Sanskrit
## Paper III
# संस्कृतम्
## तृतीयं प्रश्नपत्रम्

समय : 2½ घंटे] [पूर्णाङ्काः : 150

**सूचना :** (*i*) अस्मिन् पत्रे 75 बहुविकल्पाः प्रश्नाः सन्ति।
(*ii*) प्रतिप्रश्नं **द्वौ** अङ्कौ स्तः।
(*iii*) **सर्वे** प्रश्नाः समाधेयाः।

1. कः आत्मास्तित्वं प्रत्येति ?

(A) एकः

(B) भिन्नः

(C) सर्वः

(D) नाना

2. अधस्तनवर्गयोः युग्मपर्यायेषु योग्यं विचिनुत :

(*a*) दुःखत्रयाभिघातात् (*p*) व्यक्तम्

(*b*) हेतुमत् (*q*) जिज्ञासा

(*c*) प्रकाशकम् (*r*) सत्कार्यम्

(*d*) कारणभावात् (*s*) सत्त्वम्

(A) *ap* *bq* *cr* *ds*

(B) *as* *br* *cq* *dp*

(C) *aq* *bp* *cs* *dr*

(D) *ar* *bs* *cp* *dq*

3. जैनदर्शने प्रसिद्धः नयः कः ?

(A) सप्तभङ्गिनयः

(B) द्विभङ्गिनयः

(C) पञ्चभङ्गिनयः

(D) अष्टभङ्गिनयः

4. रिक्तस्थानं पूरयत—'तद्.........स्वरूपेऽवस्थानम्।

(A) द्रष्टुः

(B) प्रष्टुः

(C) स्रष्टुः

(D) वक्तुः

5. कतिविधः समाधिः ?

(A) द्विविधः

(B) त्रिविधः

(C) चतुर्विधः

(D) पञ्चविधः

www.prepp.in

Prepp
Your Personal Exams Guide



6. रिक्तस्थानं पूरयत—'अस्य सामान्यस्य शब्दादय:.................'।

(A) समाधय:

(B) विशेषा:

(C) गुणा:

(D) आत्मान:

7. तस्य प्रान्तभूमि: प्रज्ञा कतिधा ?

(A) एकधा

(B) त्रिधा

(C) सप्तधा

(D) नवधा

8. क: अभ्यास: ?

(A) तीव्रवेगानामासन्न: अभ्यास:

(B) तस्य वाचक: प्रणव: अभ्यास:

(C) उचितवर्तनं नाम अभ्यास:

(D) तत्र स्थितौ यत्न: अभ्यास:

9. अधस्तनेषु समीचीनं युग्मपर्यायं विचिनुत :

| | | | |
|---|---|---|---|
| (*a*) | केवलाद्वैतिन: | (*p*) | साङ्ख्या: |
| (*b*) | क्षणभङ्गवादिन: | (*q*) | शङ्कराचार्या: |
| (*c*) | द्वैतवादिन: | (*r*) | सेश्वरसाङ्ख्या: |
| (*d*) | द्वैते ईश्वरवादिन: | (*s*) | बौद्धा: |

(A) *ap* *bq* *cr* *ds*

(B) *ar* *bp* *cs* *dq*

(C) *aq* *bs* *cp* *dr*

(D) *as* *br* *cq* *dp*

10. परार्थानुमानस्य पञ्चावयववाक्येषु उपनय: कतम: ?

(A) प्रथम:

(B) द्वितीय:

(C) तृतीय:

(D) चतुर्थ:

www.prepp.in



11. संज्ञासंज्ञिज्ञानसम्बन्धज्ञानं किमस्ति ?

(A) उपमानम्

(B) उपमितिः

(C) अनुमानम्

(D) अनुमितिः

12. साध्याभावज्ञाने प्रमात्वज्ञानं किं भवति ?

(A) नानुकूलकम्

(B) सप्रतिबन्धकम्

(C) न प्रतिबन्धकम्

(D) सत्प्रतिपक्षकम्

13. सिषाधयिषाविरहविशिष्टिसिद्ध्यभावो नाम :

(A) हेतुता

(B) व्याप्यता

(C) पक्षता

(D) व्यापकता

14. 'भाक्तमाहुस्तमन्ये' अत्र 'भाक्तं' नाम किम् ?

(A) संकेतः

(B) लक्ष्यार्थः

(C) व्यङ्ग्यार्थः

(D) वाच्यार्थः

15. का चतुर्विंशतिसाहस्री संहिता ?

(A) कुमारसम्भवम्

(B) रामायणम्

(C) शाङ्करभाष्यम्

(D) न्यायशास्त्रम्

16. एतत् आदिकाव्यं वर्तते :

(A) रघुवंशम्

(B) रामायणम्

(C) बुद्धचरितम्

(D) महाभारतम्

17. अयं धीरोदात्तनायकोऽस्ति :

(A) दुष्यन्तः

(B) भीमः

(C) चारुदत्तः

(D) उदयनः

18. सात्त्विकभावाः कति ?

(A) अष्ट

(B) त्रयस्त्रिंशत्

(C) द्वौ

(D) नव

www.prepp.in

Prepp
Your Personal Exams Guide



19. अयोध्यानगर्याः प्राचीनं नाम किं वर्तते ?

(A) साकेतम्

(B) मिथिला

(C) वैशाली

(D) श्रावस्ती

20. 'अष्टौ श्लोकसहस्राणि अष्टौ श्लोकशतानि च' एषा पङ्क्तिः कं काव्यमनुसरति ?

(A) महाभारतम्

(B) उपपुराणवाङ्मयम्

(C) रामायणम्

(D) अर्थशास्त्रम्

21. एषु किं महाभारतस्य खिलपर्व ?

(A) आदिपर्व

(B) हरिवंशम्

(C) वनपर्व

(D) मौसलपर्व

22. महाभारते "आपदः सन्तु नः शश्वद्' एषा प्रसिद्धा उक्तिः कस्याः ?

(A) द्रौपद्याः

(B) गान्धार्याः

(C) विदुलायाः

(D) कुन्त्याः

23. पुराणं कति लक्षणात्मकम् ?

(A) त्रिलक्षणात्मकम्

(B) चतुर्लक्षणात्मकम्

(C) पञ्चलक्षणात्मकम्

(D) षट्लक्षणात्मकम्

24. कति उपपुराणानि ?

(A) द्वादश

(B) त्रयोदश

(C) अष्टादश

(D) पञ्चदश

www.prepp.in



25. कस्मिन् पुराणे 'विद्यावतां परीक्षा' भवति ?

(A) ब्रह्माण्डपुराणे

(B) भागवतपुराणे

(C) स्कन्दपुराणे

(D) नारदपुराणे

26. कौटिलीये अर्थशास्त्रे कति अधिकरणानि ?

(A) पञ्चदश

(B) दश

(C) नव

(D) त्रयोदश

27. 'गूढपुरुष:' नाम :

(A) सचिव:

(B) अमात्य:

(C) गुप्तचर:

(D) शिष्य:

28. मनुस्मृत्यां राजधर्म: कस्मिन् अध्याये वर्तते ?

(A) प्रथमे

(B) सप्तमे

(C) अष्टमे

(D) द्वितीये

29. तत् हि व्यवहारपदं :

(A) स्मृत्याचारव्यपेतम्

(B) लेख्यव्यपेतम्

(C) श्रुतिव्यपेतम्

(D) स्मृतिव्यपेतम्

30. अधस्तनवाक्यानां सत्यासत्यपर्यायेषु समीचीनं विचिनुत :

(*a*) विनयाधानात् स पिता प्रजानाम्।

(*b*) प्रजानां भूत्यर्थं स बलिमग्रहीत्।

(*c*) ज्ञाने मौनं क्षमा शक्तौ।

(*d*) धर्म एव मनीषिण:।

(A) सत्यम् सत्यम् सत्यम् सत्यम्

(B) असत्यम् सत्यम् असत्यम् सत्यम्

(C) सत्यम् असत्यम् सत्यम् असत्यम्

(D) असत्यम् असत्यम् असत्यम् असत्यम्

www.prepp.in



31. रससम्प्रदायस्य प्रवर्तकोऽसौ ?

(A) जगन्नाथः

(B) भरतमुनिः

(C) भामहः

(D) वामनः

32. रससूत्रस्य व्याख्याकर्तारः कति सन्ति ?

(A) त्रयः

(B) चत्वारः

(C) पञ्च

(D) षट्

33. काव्यप्रयोजनेषु किं सकलप्रयोजनमौलिभूतम् ?

(A) धनम्

(B) यशः

(C) शिवेतरक्षतिः

(D) परनिर्वृतिः

34. 'निरस्तनारीसमया दुराधयः' इति केन उक्तम् ?

(A) युधिष्ठिरेण

(B) अर्जुनेन

(C) द्रौपद्या

(D) भीमेन

35. शूद्रकस्य राजसभायां कः खगः वदति ?

(A) हंसः

(B) शुकः

(C) मयूरः

(D) चातकः

36. 'रोदसी' इति पदस्य कोऽर्थः ?

(A) पृथिवी

(B) द्यौः

(C) द्यावापृथिवी

(D) क्रन्दमानास्त्री

www.prepp.in



37. अधस्तनयुग्मानां समीचीनां तालिकां विचिनुत :

| | | | |
|---|---|---|---|
| (*a*) | हेतुः | (*p*) | स देवानामिन्द्रियाण्ययुवत। तद् यमस्य यमत्वम्। |
| (*b*) | निर्वचनम् | (*q*) | होतव्यमुत न होतव्यम्। |
| (*c*) | पुराकल्पः | (*r*) | शूर्पेण जुहोति। |
| (*d*) | संशयः | (*s*) | देवाः सांमनस्या इष्ट्या यजेरन्। |

(A) *aq* *br* *cs* *dp*

(B) *ar* *bp* *cs* *dq*

(C) *ap* *bq* *cr* *ds*

(D) *as* *bp* *cq* *dr*

38. शुनःशेपस्य पितुः नामधेयं किम् ?

(A) अजीगर्तः

(B) हरिश्चन्द्रः

(C) रोहितः

(D) नारदः

39. 'अश्वान् अभिक्षिपन्' (ऋ. 5.63.3) इत्यस्य वैदिकः सन्धिः कथं भवति ?

(A) अश्वान्नभिक्षिपन्

(B) अश्वाँ अभिक्षिपन्

(C) अश्वानभिक्षिपन्

(D) अश्वा अभिक्षिपन्

40. 'उदितो' (ऋ. 10.121) इत्यस्य पदपाठीयं रूपं किम् ?

(A) ऊँ इति। दि तः।

(B) उऽदितः।

(C) उत्ऽइतः।

(D) उत्। इतः।

41. अधोनिर्दिष्टेषु किं समानाक्षरं नास्ति ?

(A) अ

(B) इ

(C) ऐ

(D) उ

www.prepp.in

Prepp
Your Personal Exams Guide



42. राष्ट्राभिवर्धनं केन साधनेन क्रियते ?

(A) यातुधानसाहाय्येन

(B) रथचक्रनेमिमणिना

(C) सपत्नसाहाय्येन

(D) पत्नीसाहाय्येन

43. केनोपनिषदि कयोः संवादः ?

(A) उमेन्द्रयोः

(B) यमनचिकेतसोः

(C) मैत्रेयि–याज्ञवल्क्ययोः

(D) जबालासत्यकामयोः

44. समीचीनं युग्मपर्यायं विचिनुत :

(*a*) ईशावास्यमिदं सर्वम् (*p*) कठोपनिषत्

(*b*) अन्नं न निन्द्यात् (*q*) ईशावास्योपनिषत्

(*c*) अपीदं सर्वं दहेयम् (*r*) तैत्तिरीयोपनिषत्

(*d*) तवैव वाहा: तव नृत्तगीते (*s*) केनोपनिषत्

(A) *ap* *bq* *cr* *ds*

(B) *ar* *bs* *cp* *dq*

(C) *aq* *br* *cs* *dp*

(D) *as* *bp* *cq* *dr*

45. रिक्तस्थानं पूरयत–'इमाः ..................... सतूर्याः सरथाः'।

(A) रामाः

(B) मालाः

(C) मायाः

(D) वनिताः

46. समीचीनं सत्यासत्यपर्यायं विचिनुत :

(*a*) आत्मनस्तु कामाय सर्वं प्रियं भवति।

(*b*) आत्मनस्तु कामाय सर्वमप्रियं भवति।

(*c*) सत्यं वद।

(*d*) सत्यं मा वद।

(A) सत् असत् असत् सत्

(B) असत् सत् सत् असत्

(C) सत् असत् सत् असत्

(D) असत् सत् असत् सत्

47. तैत्तिरीयोपनिषदि कस्य ऋषेः वेदानुशासनम् :

(A) भृगोः

(B) सत्यकामस्य

(C) वरुणस्य

(D) त्रिशङ्कोः

www.prepp.in

Prepp
Your Personal Exams Guide



48. अधस्तनेषु समीचीनं सत्यासत्यपर्यायं विचिनुत :

(*a*) योगसूत्रे प्रमाणत्रयं स्वीकृतम्।

(*b*) केवलाद्वैतसिद्धान्ते चत्वारि प्रमाणानि।

(*c*) बौद्धमते षट्प्रमाणानि।

(*d*) जैनमते प्रमाणविचारो नास्ति।

(A) सत्यम् असत्यम् सत्यम् असत्यम्

(B) असत्यम् सत्यम् असत्यम् सत्यम्

(C) असत्यम् असत्यम् सत्यम् सत्यम्

(D) सत्यम् सत्यम् असत्यम् असत्यम्

49. यास्कमतेन 'तत्त्वायामि' इति कस्योदाहरणम् ?

(A) उपधालोपस्य

(B) अन्तलोपस्य

(C) वर्णलोपस्य

(D) वर्णोपजनस्य

50. अधोनिर्दिष्टेषु वर्णेषु अघोषः कः ?

(A) ग

(B) ख

(C) ब

(D) भ

51. भूधातोः लुटि किं रूपम् ?

(A) भवेत्

(B) भविता

(C) भयात्

(D) बभूव

52. 'राजदन्त' इति कः समासः ?

(A) बहुव्रीहिः

(B) तत्पुरुषः

(C) द्वन्द्वः

(D) कर्मधारयः

53. उपसर्जनसंज्ञायाः किं सूत्रम् ?

(A) उपसर्जनं पूर्वम्

(B) एकविभक्ति चापूर्वनिपाते

(C) उपसर्गाः क्रियायोगे

(D) गोस्त्रियोरुपसर्जनस्य

54. 'दानीयो विप्रः' इत्यत्र कृत्यप्रत्ययः कस्मिन् कारके ?

(A) संप्रदाने

(B) कर्तरि

(C) कर्मणि

(D) करणे

www.prepp.in



55. 'गोपी' इत्यस्य कः पदार्थः ?

(A) गाः पालयति इति गोपी

(B) गोपस्य स्त्री इति गोपी

(C) गोपः अस्याः अस्ति इति गोपी

(D) गाः पाति इति गोपी

56. अधस्तनवाक्यानां सत्यासत्यपर्यायेषु योग्यं विचिनुत :

(*a*) गरीयाञ्शब्दोपदशो लघीयानपशब्दोपदेशः

(*b*) अनभ्युपायः शब्दानां प्रतिपनौ प्रतिपदपाठः

(*c*) विशेषेण उत्सर्गः सामान्येनापवादः

(*d*) आकृतिर्हि नित्या द्रव्यमनित्यम्

(A) सत्यम् असत्यम् असत्यम् असत्यम्

(B) असत्यम् सत्यम् असत्यम् सत्यम्

(C) असत्यम् सत्यम् सत्यम् असत्यम्

(D) असत्यम् असत्यम् असत्यम् सत्यम्

57. अधस्तनेषु सत्यासत्यपर्यायेषु समीचीनं विचिनुत :

(*a*) लिटि धातोः अडागमो भवति।

(*b*) यासुडागमः उदात्तो वर्तते।

(*c*) अपित् सार्वधातुकप्रत्ययो ङिद्वद् न भवति।

(*d*) आशिषि लिङ् स्तिङ् सार्वधातुकसंज्ञः स्यात्।

(A) असत्यम् सत्यम् असत्यम् असत्यम्

(B) सत्यम् सत्यम् असत्यम् असत्यम्

(C) असत्यम् सत्यम् सत्यम् सत्यम्

(D) असत्यम् असत्यम् सत्यम् सत्यम्

58. अधस्तनवर्गयोः योग्यं युग्मपर्यायं विचिनुत :

| | |
|---|---|
| (*a*) रक्षा | (*p*) देवा अदुहू |
| (*b*) ऊहः | (*q*) लिङ्गविपरिणामः |
| (*c*) आगमः | (*r*) वेदोऽध्येयो ज्ञेयः |
| (*d*) असंदेहः | (*s*) स्थूलपृषतीम् |

(A) *ap* *bq* *cr* *ds*

(B) *as* *br* *cq* *dp*

(C) *ap* *bq* *cs* *dr*

(D) *aq* *bp* *cs* *dr*

www.prepp.in

Prepp
Your Personal Exams Guide



59. 'सप्तभिः पदैरवाप्यते' इत्यस्य तद्धितरूपं किम ?

(A) सप्तपदी

(B) साप्तपदी

(C) साप्तपदीनम्

(D) सप्तपदीनम्

60. संस्कृतगतपकारस्य आङ्गलभाषायां '*f*' वर्णे परिवर्तनम्............. ।

(A) ग्रीमनियमतः

(B) रास्कनियमतः

(C) वेर्नरनियमतः

(D) ग्रासमाननियमतः

61. क्रियासिद्धौ प्रकृष्टोपकारकं किसंज्ञं भवति ?

(A) कर्तृसंज्ञम्

(B) कर्मसंज्ञम्

(C) करणसंज्ञम्

(D) अधिकरणसंज्ञम्

62. 'शालीनां भवनं क्षेत्रम्' इति कस्य विग्रहः ?

(A) शालेयशब्दस्य

(B) शालीयशब्दस्य

(C) शालीनशब्दस्य

(D) शालिनशब्दस्य

63. सिद्धा द्यौः सिद्धा पृथिवी सिद्धमाकाशमित्यत्र सिद्ध शब्दस्य कः पदार्थः ?

(A) नित्यः

(B) अनित्यः

(C) कार्यः

(D) साध्यः

64. युवन्शब्दात् स्त्रीप्रत्यये परे किं रूपम् ?

(A) युवा

(B) युवतिः

(C) युवती

(D) युवनी

www.prepp.in

Prepp
Your Personal Exams Guide



65. अधस्तनवाक्यानां सत्यासत्यपर्यायेषु योग्यं विचिनुत।

(*a*) नाद: क्रमवान् अस्ति।

(*b*) परिपूर्वाद् रम्धातो: परस्मैपदं भवति।

(*c*) 'गोरक्षितम्' इति पदं चतुर्थीतत्पुरुषसमास-सूत्रेण युक्तं भवति।

(*d*) हकार: द्विविध:—औरस्य: कण्ठ्यश्च।

(A) सत्यम् सत्यम् सत्यम् सत्यम्

(B) सत्यम् सत्यम् सत्यम् असत्यम्

(C) सत्यम् सत्यम् असत्यम् सत्यम्

(D) सत्यम् असत्यम् सत्यम् सत्यम्

66. केषां विधेयार्थपरिच्छेदकतया अर्थवत्त्वम् ?

(A) अर्थवादवाक्यानाम्

(B) विधिवाक्यानाम्

(C) निषेधवाक्यानाम्

(D) नामधेयानाम्

67. अधस्तनेषु युग्मपर्यायेषु योग्यं विचिनुत :

(*a*) न कलञ्जं भक्षयेत् (*p*) गुणवाद:

(*b*) आदित्यो यूप: (*q*) तद्व्यपदेश:

(*c*) अग्निर्हिमस्य भेषजम् (*r*) निषेध:

(*d*) श्येनेनाभिचरन् यजेत (*s*) अनुवाद:

(A) *ar* *bp* *cs* *dq*

(B) *ap* *bq* *cr* *ds*

(C) *aq* *bs* *cp* *dr*

(D) *as* *br* *cq* *dp*

68. आर्थी भावनाया: इतिकर्तव्यताकाङ्क्षायां किमन्वेति ?

(A) स्वर्गादिफलम्

(B) लिङादिज्ञानम्

(C) अर्थवादज्ञाप्यप्राशस्त्यज्ञानम्

(D) प्रयाजाद्यङ्गजातम्

69. श्रोत्रेण शब्दसाक्षात्कारे क: सन्निकर्ष: ?

(A) समवाय:

(B) संयुक्त समवाय:

(C) संयुक्त समवेतसमवाय:

(D) संयोग:

www.prepp.in

Prepp
Your Personal Exams Guide



70. 'नेदं जीवच्छरीरं तथा, तस्मान्न तथेति' कस्योदाहरणमेतत् ?

(A) केवलव्यतिरेकिण:

(B) केवलान्वयिन:

(C) पक्षधर्मत्वस्य

(D) सपक्षस्य

71. अधस्तनेषु युग्मपर्यायेषु समीचीनं विचिनुत :

| | | | |
|---|---|---|---|
| (*a*) | स्वरूपासिद्ध: | (*p*) | शब्दो नित्य: कृतकत्वादाकाशादिवत् |
| (*b*) | विरुद्ध: | (*q*) | अग्निरनुष्ण: कृतकत्वाज्जलवत् |
| (*c*) | साधारण: | (*r*) | शब्दोऽनित्य: चाक्षुषत्वाद् घटवत् |
| (*d*) | बाध: | (*s*) | नित्य: शब्द: प्रमेयत्वाद् व्योमवत् |

(A) *ap* *bq* *cr* *ds*

(B) *ar* *bp* *cs* *dq*

(C) *as* *br* *cq* *dp*

(D) *aq* *bs* *cp* *dr*

72. जैनदर्शने कतिविधं ज्ञानं स्वीकृतम् ?

(A) त्रिविधम्

(B) पञ्चविधम्

(C) सप्तविधम्

(D) नवविधम्

73. रिक्तस्थानं पूरयत—'सर्वथावद्ययोगानां.......... चारित्रमुच्यते'।

(A) भोग:

(B) राग:

(C) विराग:

(D) त्याग:

74. रिक्तस्थानं पूरयत—'प्रच्छर्दनविधारणाभ्यां वा..................'।

(A) शीर्षस्य

(B) प्राणस्य

(C) मुखस्य

(D) हस्तस्य

75. तदर्थभावनं किम् ?

(A) तल्लिङ्गम्

(B) तत्प्राणम्

(C) तज्जप:

(D) तल्लक्ष:

www.prepp.in



## ROUGH WORK